पूर्व्वेभिरृषिभिरीड्यो नूतनैरुत स देवा एह वक्ष्यति”।) रिषिईंसादिश्च। “विद्याविदग्धमतयो रिषयः प्रसिद्धाः”। इति प्रयोगात्। इति भरतः॥ तत्पर्य्यायः। सत्यवचाः २ शापास्त्रः ३। स तु सप्तविधः यथा। व्यासाद्या महर्षयः १ भेलाद्याः परमर्षयः २ कण्वादयो देवर्षयः ३ वशिष्ठाद्या ब्रह्मर्षयः ४ सुश्रुताद्याः श्रुतर्षयः ५ ऋतपर्णादयो राजर्षयः ६ जैमिन्याद्याः काण्डर्षयः। इति त्रिकाण्डशेषः। तथा च रत्नकोषे।

“सप्त ब्रह्मर्षि-देवर्षि-महर्षि-परमर्षयः।
काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः॥” ॥

मन्वन्तरभेदे सप्तर्षिनामानि यथा।

१ स्वायम्भुवमन्वन्तरे मरीचिः। अत्रिः। अङ्गिराः। पुलस्त्यः। पुलहः। क्रतुः। वशिष्ठः। (यथा हरिवंशे। ७।८।

“मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः” ॥)

२। स्वारोचिषे उर्ज्जस्तम्भादयः।
(यथा, मार्कण्डेये ६७। ४।

“उर्ज्जस्तम्भस्तथा प्राणो दत्तोलिरृषभस्तथा।
निश्चरश्चार्व्वबीराश्च तत्र सप्तर्षयोऽभवन्” ॥)

३। उत्तमे वशिष्ठसुताः प्रमदादयः।
(यथा, मार्कण्डेये ७३। १३।

“स्वतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयास्तत्रान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्” ॥)

४। तामसे ज्योतिर्धामादयः।
(यथा मार्कण्डेये ७४। ५९।

“ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वलकस्तथा।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्” ।)

५। रैवते हिरण्यरोमा वेदशिरा ऊर्द्धबाहुरित्यादयः। (यथा मार्कण्डेये ७५। ७३-७४।

“हिरण्यरोमा वेदश्रीरूर्द्धबाहुस्तथापरः।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः” ॥)

६। चाक्षुषे सुमेधप्रभृतयः। ...

(मार्कण्डेयमतानुयायिन उच्यन्ते तत्रैव।७६।५४।

“सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः” ।)

७। वैवस्वताख्यवर्त्तमानमन्वन्तरे काश्यपः। अत्रिः। वशिष्ठः। विश्वामित्रः। गौतमः। जमदग्निः। भरद्वाजः। (यथा मार्कण्डेये ७९। ९-१०।

“अत्रिश्चैव वशिष्ठश्च काश्यपश्च महानृषिः।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः॥
तथैव पुत्रो भगवानृचीकस्य महात्मनः।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे” ॥)

८। सावर्णिके गालवः। दीप्तिमान्। परशुरामः। अश्वत्थामा। कृपः। ऋष्यशृङ्गः। व्यासः। (यथा, मार्कण्डेये ८०। ४।

“रामो व्यासो गालवश्च दीप्तिमान् कृप एव च।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन्” ॥

रामः परशुरामः। द्रौणिरश्वत्थामा ॥)

९। दक्षसावर्णिके द्युतिमदाद्याः।
(यथा मार्कण्डेये ९४।८।

“मेधातिथिर्व्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽन्यः सबलस्तथान्यो हव्यवाहनः” ॥)

१०। ब्रह्मसावर्णिके हविष्मत्सुकृतसत्यजयमूर्त्याद्याः। (यथा मार्कण्डेये ९४। १०, १३, १४।

“मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज!॥
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा।
आपो भूतिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः” ॥)

११। धर्म्मसावर्णिके अरुणादयः।
(यथा मार्कण्डेये ९४। १९-२०।

“हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः।
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः” ॥)

१२। रुद्रसावर्णिके तपोमूर्त्त्यादयः।
(यथा मार्कण्डेये ९४।२५।

“द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः” ॥)

१३। देवसावर्णिके निर्म्मोहतत्त्वदर्श्याद्याः। (मार्कण्डेयपुराणमते अयं त्रयोदशमनुः रौच्याख्ययाभिहितः। यथा, तत्रैव ९४। २७-३०।

“त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान्।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे।
सुशर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम!॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः।
भविष्यानथ सप्तर्षीन् गदतो मे निशामय॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः” ॥)

१४। इन्द्रसावर्णिके अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। (मार्कण्डेयपुराणमतेऽयं भौत्याख्ययाभिहितः। यथा तत्रैव ९९। १।

“ततः परन्तु भौत्यस्य समुत्पत्तिं निशामय।
देवानृषींस्तथा पुत्त्रांस्तथैव वसुधाधिपान्” ॥

ततः परं त्रयोदशमन्वन्तरानन्तरम्। अस्मिन् मन्वन्तरे सप्तर्षिनामान्याह तत्रैव १००। ३१।

“अग्नीध्रश्चाग्निबाहुश्च शुचिर्मुक्तोऽथ माधवः।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः” ॥

पुराणान्तरे मतभेदात् मन्वन्तरसप्तर्षीणां नामभेदोऽपि दृश्यते। हरिवंशे ७ अध्याये तथा विष्णुपुराणे ३ अंशे अस्य विवरणादिकं द्रष्टव्यम्॥) ॥*॥ ज्योतिःशास्त्रमते वशिष्ठपत्न्यरुन्धतीसहितवर्त्तमानमन्वन्तरीयसप्तर्षीणां मघानक्षत्रे स्थितिः तस्योदये तेषाञ्चोदयो भवति। काशीखण्डमते शनिलोकादूर्द्धं ध्रुवलोकात् अधः तेषां स्थितिः ॥*॥ वेदः। किरणः। इति मेदिनी॥ भृग्वादिमहर्षिसन्तानः। यथा।

“भृगुर्म्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्द्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्षयस्तस्माद्भूतास्तस्मान्महर्षयः॥
ईश्वराणां सुतास्तेषामृषयस्तान् निबोधत।
काव्यो बृहस्पतिश्चैव कश्यपश्च्यवनस्तथा।
उतथ्यो वामदेवश्च अगस्त्यश्चौषिजस्तथा” ॥

औषिजस्थाने कौशिक इति वा पाठः।

“कर्द्दमो बालिखिल्याश्च विश्रवाः शक्तिवर्द्धनः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः” ॥

इति। तस्य व्युत्पत्तिर्यथा।

“ऋषि हिंसागतौ धातुर्व्विद्यासत्यतपःश्रुतिः।
एष सन्निचयो यस्मात् ब्रह्मणश्च ततः त्वृषिः॥
निवृत्तिसमकालन्तु बुद्ध्या व्यक्तिमृषिस्त्वगम्।
ऋषन्ते परमां यस्मात् परमर्षिस्ततः स्मृतः॥
गत्यर्थादृषतेर्धातोर्नामनिर्वृत्तिकारणम्।
यस्मादेष स्वयम्भूतस्तस्माच्च ऋषिता मता” ॥

इति मत्स्यपुराणे १२० अध्यायः॥

ऋषिकः, } पुं, (ऋषेः पुत्त्रः। ऋषि + कन्।) काव्यादि-ऋषिपुत्त्रः। यथा।
ऋषीकः, }

“ऋषिपुत्त्रा ऋषीकास्तु मैथुनाद्गर्भसम्भवात्।
परत्वेनर्षयस्ते वै भूतादिऋषिकास्ततः॥
ऋषीकाणां सुता ये वै विज्ञेया ऋषिपुत्त्रकाः।
इत्येते ऋषयः प्रोक्तास्तपसा ऋषितां गताः॥
तेषां पुत्त्रानृषीकांस्तु गर्भोत्पन्नान्निबोधत।
वत्सरो नग्नहश्चैव भारद्वाजश्च वीर्य्यवान्।
ऋषिर्द्दीर्घतपाश्चैव बृहदुक्थ्यः शरद्वतः॥
वाजिश्रवाः सुचित्तश्च श्यावोऽश्वश्च पराशरः।
शृङ्गी च कश्यपश्चैव राजा वैश्रवणस्तदा॥
इत्येते ऋषिकाः सर्व्वे सत्येन ऋषितां गताः” ।

इति मात्स्ये १२० अध्यायः॥

ऋषिकुल्या, स्त्री, (ऋषीणां कुल्या कृत्रिमाल्पा सरित् इव।) नदी। इति हेमचन्द्रः॥ (“ऋषिकुल्यां समासाद्य नरः स्नात्वा विकल्मषः। देवान् पितॄन् चार्च्चयित्वा ऋषिलोकं प्रपद्यते” ॥ इति महाभारते। तीर्थयात्रापर्व्वणि ३। ८४। ४६॥ ऋषिकुलाय हितम्। ऋषिकुल + यत्। ऋषिकुलहिते, त्रि। यथा, भागवते ३। १६। १३।

“अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीम्।
नास्वाद्य मन्युदग्धानां तेषामात्माप्यतृप्यत” ॥)

ऋषिजाङ्गलिकी, स्त्री, (ऋषिप्रिया जाङ्गलिकी।) ऋक्षगन्धावृक्षः। इति रत्नमाला॥ ऋषिजाङ्गल इति ख्यातः। (वृद्धदारकशब्देऽस्या विशेषो ज्ञेयः॥)

ऋषिप्रोक्ता, स्त्री, (ऋषिणा प्रोक्ता औषधार्थम्।) माषपर्णीवृक्षः। इति रत्नमाला॥ (माषपर्णीशब्देऽस्या गुणादिकं ज्ञेयम्॥)

ऋष्टिः, स्त्री, (ऋष् हिंसायां + क्तिन्।) खड्गः। इत्यमरः॥ (यथा, ऋग्वेदे। ५। ५७। २।

“वाशीमन्त ऋष्टिमन्तो मनीषिणः।
सुधन्वान इषुमन्तो निषङ्गिणः” ॥

आयुधमात्रम्। यथा ऋग्वेदे १। १६६। ४।

“भयन्ते विश्वाभुवनानि हर्म्म्या।
चित्रो वो यामः प्रयतास्वृष्टिषु” ॥

“ऋष्टिषु यज्ञस्यहेतिषु”। इति भाष्यम्।
तथा तत्रैव। ५। ५२। ६।
“आ रुक्मैरायुधा नर ऋष्वा ऋष्टीरसृक्षत”।